Prayers for Eight Immortal Beings

चिरञ्जीवीप्रार्थना

Document Information

Text title : Prayers for Eight Immortal Beings

File name : chiranjIvIprArthanA.itx

Category : deities_misc

Location : doc_deities_misc

Description/comments : For chanting for ugrarathashAnti (celebrating 60+ years) or called ShaShTyabdapUrti ShaShTi pUrti

Latest update : October 24, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 24, 2019

sanskritdocuments.org

चिरञ्जीवीप्रार्थना

अश्वत्थामा बलिर्व्यासो हनूमांश्च बिभीषणः ।
कृपः परशुरामश्च सप्तैते चिरजीविनः ॥

सप्तैतान् संस्मरेन्नित्यं मार्कण्डेयमथाष्टमम् ।
जीवेत् वर्षशतं साग्रमपमृत्युविवर्जितः ॥

मार्कण्डेयाद्यावाहितदेवताः प्रार्थयेत् ।

ॐ मार्कण्डेयाय नमः ।
पुत्रपौत्रप्रदं नित्यं प्रार्थयामि महामतिम् ।
रत्नगर्भसुमङ्गल्यचूतपल्लवशोभितम् ।
चन्दनाक्षतपुष्पाढ्यं पूर्णकुम्भं नमोऽस्तु ते ॥ १
आयुष्प्रद महाभाग सोमवंशविवर्धन ।
महाव्रत महाश्रेष्ठ मार्कण्डेय नमोऽस्तु ते ॥ २
मार्कण्डेय महाभाग सप्तकल्पान्तजीवन ।
आयुरारोग्यमैश्वर्यमस्माकं वरदो भव ॥ ३
नववर्षायुषं प्राप्य तपसा महता परम् ।
सप्तकल्पकृतं येन ह्यायुषं मे प्रयच्छतु ॥ ४
क्षित्यव्वायुवियत्तेजोब्रह्मविष्णुमहेश्वराः ।
मामेव हि सदा पान्तु मार्कण्डेयो भवाम्यहम् ॥ ५
मनो बुद्धिरहङ्कारचन्द्रादित्याश्च देवताः ।
मामेव हि सदा पान्तु चिरञ्जीवी भवाम्यहम् ॥ ६
कालात्मरथमध्यस्थ उग्रवीर क्षयान्तक ।
ग्रहर्क्षवत्सराद्यात्मन् नमस्ते मृत्युनायक ॥ ७
ममागतादुग्ररथभयादुद्धर रक्षक ।
पाहि पाहि महादेव त्वमेव शरणं मम ॥ ८
षष्टिसंवत्सरे पूर्णे प्राप्ते ह्युग्ररथाह्वये ।

दीर्घायुषं तु मां कुर्वन् सुप्रीतो भव सर्वदा ॥ ९
मार्कण्डेय महाभाग कल्पायुर्ज्ञानविग्रह ।
आयुर्बलं यशो धैर्यं यच्छ मे ब्रह्मनन्दन ॥ १०

अश्वत्थामा -
द्रौणे मे त्वं महाभाग रुद्रतेजःसमुद्भव ।
आयुर्बलं यशो देहि अश्वत्थामन् नमोऽस्तु ते ॥

बलिः -
दैत्येन्द्रकुलसम्भूत यज्ञदानक्रियारत ।
बले त्वां शरणं यामि दीर्घमायुः प्रयच्छ मे ॥

व्यासः -
वसिष्ठकुलसम्भूत वेदशास्त्रविशारद ।
नारायणांशसम्भूत वेदव्यास नमोऽस्तु ते ॥

हनुमान् -
अञ्जनीगर्भसम्भूत कपीन्द्र सचिवोत्तम ।
रामप्रिय नमस्तुभ्यं हनूमन् रक्ष मां सदा ॥

बिभीषणः -
बिभीषण नमस्तुभ्यं रामपादाब्जपूजक ।
आयुरारोग्यमैश्वर्यं देहि पौलस्त्यनन्दन ॥

कृपः -
द्विजेन्द्र भरताचार्य सर्वविद्याविशारद ।
शरणं त्वां प्रपन्नोऽस्मि कृप मां रक्ष सर्वदा ॥

परशुरामः -
रेणुकेय महावीर्य कार्तवीर्यकृतान्तक ।
आयुः प्रयच्छ मे राम जामदग्न्य नमोऽस्तु ते ॥

षष्ठीदेवी -
षष्ठि देवि नमस्तुभ्यं सूतिकागृहशायिनि ।
पूजिताऽसि परत्तया दीर्घमायुः प्रयच्छ मे ॥

आयुर्देह्यभयं देहि अद्य जन्मदिने मम ।
रक्ष रक्षस्व मां नित्यं देवानामपि रक्षिणि ॥

सर्वदेवप्रियकरि सर्वमङ्गलकं कुरु ! ॥

इति चिरञ्जीवीप्रार्थना समाप्ता ।

NA
This is to be chanted for ugrarathashAnti (celebrating 60+ years)
or called ShaShTyabdapUrti ShaShTi pUrti

Prayers for Eight Immortal Beings

pdf was typeset on October 24, 2019

Please send corrections to *sanskrit@cheerful.com*